सहितः केवलश्चेति कुम्भको द्विविधो मतः” ॥०।)

कुम्भकारः, पुं, (कुम्भं करोति । कुम्भ + कृ + “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) जातिविशेषः । कुमोर इति भाषा । स तु शूद्रागर्भे विश्वकर्म्मौरसाज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । कुलालः २ । इत्यमरः । २ । १० । ६ ॥ चक्री ३ । इति जटाधरः ॥ (एतज्जातिविषये तु पुराणभेदेन मतभेदो दृश्यते । यथा ।
“वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते” ॥
“मालाकाराच्चर्म्मकार्य्यां कुम्भकारो व्यजायत” ॥
“पट्टीकाराच्च तैलिक्यां कुम्भकारो बभूव ह” ॥
इत्यादि बहुजनमतमस्ति बाहुल्यभिया नास्माभिर्लिख्यते ॥) कुक्कुभपक्षी । इति हेमचन्द्रः ॥

कुम्भकारिका, स्त्री, (कुम्भस्येव कार आकारो यस्याः । कुम्भकार + कप् + टाप् अत इत्वञ्च ।) कुलत्था । इति राजनिर्घण्टः ॥ (कुम्भं करोतीति । कुम्भ + कृ + ण्वुल् स्त्रियां टाप् अत इत्वम् । कुम्भकारस्त्री । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कुम्भकारी, स्त्री, (कुम्भस्येव कार आकारो यस्याः । गौरादित्वात् ङीष् ।) कुलत्थाञ्जनम् । कुलत्थिका । इति राजनिर्घण्टः ॥ मनःशिला । इति जटाधरः ॥ (कुम्भकारस्य पत्नीति ङीष् ।) कुम्भकारभार्य्या ॥

कुम्भतुम्बी, स्त्री, (कुम्भ इव तुम्बी ।) अलावुप्रभेदः । गोल लाउ इति भाषा । तत्पर्य्यायः । कुम्भालावुः २ गोस्तनतुम्बी ३ गोरक्षी ४ नागालावुः ५ घटाभिधा ६ घटालावुः ७ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । पित्तश्वासकफाङ्गज्वरकासशमनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

कुम्भदासी, स्त्री, (कुम्भस्य वेश्यापतेर्दासी ।) कुट्टनी । इति शब्दरत्नावली ॥

कुम्भयोनिः, पुं, (कुम्भः योनिर्जन्मस्थानं यस्य ।) अगस्त्यमुनिः । (यथा रघुः ४ । २१ ।
“प्रससादोदयादम्भः कुम्भयोनेर्महौजसः” ॥)
वशिष्ठमुनिः । (एतयोर्मुनिसत्तमयोरुत्पत्तिविवरणं तु उर्व्वशीकृते कन्दर्पपीडितयोर्मित्रावरुणयोः स्खलितेनैकस्मिन् कुम्भे सङ्गतेन रेतसा यथा घटितं तथा तत् रामायणोत्तरकाण्डे ५६—५७ सर्गे विशेषतो द्रष्टव्यम् ॥) द्रोणाचार्य्यः । इति मेदिनी ॥ (अस्य उत्पत्तिकथा यथा महाभारते १।१३१।९-२४।
“गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं शंसितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्ब्बमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः ।
रूपयौवनसम्पन्नां मदद्दप्तां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः ॥)
द्रोणपुष्पीवृक्षः । इति राजनिर्घण्टः ॥ (स्त्री, अप्सरोविशेषः । यथा महाभारते । ३ । ४३ । ३० ।
“गोपाली सहजन्या च कुम्भयोनिः प्रजागरा ।
चित्रसेना चित्रलेखा सहा च मधुरस्वना” ॥)

कुम्भला, स्त्री, (कुम्भं कुम्भाकारं लाति आदत्ते । कुम्भ + ला आदाने + कः टाप् च ।) मुण्डितिका । इति रत्नमाला ॥ मुण्डिरी इति भाषा ॥ (मुण्डीशब्दे विवृतिरस्या ज्ञेया ॥)

कुम्भवीजकः, पुं, (कुम्भ इव वीजं यस्य । ततः स्वार्थे कः ।) रीठाकरञ्जः । इति राजनिर्घण्टः ॥

कुम्भशाला, स्त्री, (कुम्भाय कुम्भनिर्म्माणार्थं या शाला ।) कुम्भनिर्म्माणादिगृहम् । तत्पर्य्यायः । पाकपुटी २ । इति हेमचन्द्रः ॥

कुम्भसन्धिः, पुं, (कुम्भयोः सन्धिर्मिलनम् ।) हस्तिकुम्भद्वयमध्यस्थानम् । तत्पर्य्यायः । वारद्वः २ । इति त्रिकाण्डशेषः ॥

कुम्भसम्भवः, पुं, (कुम्भः सम्भव उत्पत्तिस्थानं यस्य ।) अगस्त्यमुनिः । इत्यमरः । १ । ३ । २० ॥ (यथा राजेन्द्रकर्णपूरे ७१ ।
“तद्युक्तं ननु कुम्भसम्भव ! भवत् प्रश्नारहस्येन यत् याश्च प्याश्च तिरोदधन्निरवधिर्विन्ध्योऽपि वन्ध्यः कृतः” ॥) वशिष्ठः । द्रोणः । एतयोरपि कुम्भोत्पत्तेस्तथात्वम् । एतद्विवरणन्तु कुम्भयोनिशब्दे द्रष्टव्यम् ॥)

कुम्भा, स्त्री, (कु कुत्सितया निन्दितरूपया उम्भा पूर्त्तिर्देहादेर्भरणं यस्याः । शकन्ध्वादित्वात् साधुः ।) वेश्या । इति शब्दमाला ॥

कुम्भाण्डः, पुं, (कुम्भ इव अण्डं यस्य ।) बाणासुरस्यामात्यविशेषः । इति श्रीभागवतम् ॥ (यथा, हरिवंशे १७५ । १६३ ।
“कुम्भाण्डवचनैरेवं दानवेन्द्रः प्रचोदितः ।
वाचं रूक्षामतिक्रुद्धः प्रोवाच वदताम्बरः” ॥
अयञ्च वाणपराजयान्ते श्रीकृष्णप्रसादात् तद्राज्यस्वामी बभूव ॥ यदुक्तं तत्रैव १८३ । २७—२८ ।

श्रीकृष्ण उवाच ।

“कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत !।
सुकृतन्ते विजानामि राष्ट्रिकोऽस्तु भवानिह ॥
सर्व्वातिमृद्धः सुसुखी निर्वृतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव ममाश्रयात्” ॥)
कुष्माण्डम् । कुष्माण्डीपर्य्याये कुम्भाण्डीदर्शनात् ॥

कुम्भाण्डी, स्त्री, (कुम्भाण्ड + स्त्रियां जातित्वात् ङीष् ।) कुष्माण्डी । इति राजनिर्घण्टः ॥

कुम्भिका, स्त्री, (कु कुत्सितरूपेण उम्भति पूरयति आच्छादयति वारि पुष्करिण्यादेः । शकन्ध्वादित्वात् साधुः ।) जलजलताविशेषः । पाना इति भाषा । तत्पर्य्यायः । वारिपर्णी २ । इत्यमरः । १।१०।३८ ॥ श्वेतपर्णा ३ अप्कुम्भी ४ पानीयपृष्ठजः ५ । इति रत्नमाला ॥ आकाशमूली ६ कुटयम् ७ जलवल्कलम् ८ । इति हारावली ॥ वारिमूली ९ खमूलिका १० पर्णी ११ एन्द्री १२ खमूली १३ खमूलिः १४ वारिकर्णिका १५ । इति शब्दरत्नावली ॥ कुमुदा १६ दलाढकः १७ । इति जटाधरः ॥ अस्य गुणाः वारिपर्णीशब्दे द्रष्टव्याः । पाटलावृक्षः । द्रोणपुष्पी । इति राजनिर्घण्टः ॥ नेत्ररोगविशेषः । तस्य लक्षणं यथा,—
“वर्त्मान्ते पिड़का ध्माता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकवीजसदृशाः कुम्भिकाः सन्निपातजाः” ॥
इति माधवकरः ॥ (कुम्भा + स्वार्थे कन् टाप् इत्वञ्च । वेश्या । इति शब्दमाला । कट्फलम् । भावप्रकाशे अस्याः पर्य्यायाः यथा,—
“कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च” ॥
गुणाश्चास्याः कट्फलशब्दे बोद्धव्याः ॥)

कुम्भिनीवीजं, क्ली, (कुम्भिन्या वीजम् ।) जयपालः । इति राजनिर्घण्टः ॥

कुम्भिपाकी, स्त्री, (कुम्भिना पाकोऽस्याः । गौरादित्वात् ङीष् ।) कट्फलः । इति भावप्रकाशः ॥

कुम्भिमदः, पुं, (कुम्भोऽस्त्यस्य कुम्भी हस्ती तस्य मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥ (गन्धद्रव्यविशेषः ॥)

कुम्भिलः, पुं, (कुम्भ + इलच् ।) चोरः । शालमत्स्यः । श्लोकार्थचौरः । श्यालः । इति हेमचन्द्रः ॥

कुम्भी, [न्] पुं, (कुम्भोऽस्यास्तीति । इनिः ।) हस्ती । कुम्भीरः । इति हेमचन्द्रः ॥ गुग्गुलुः । इति जटाधरः ॥ (अग्निप्रकृतिविषकीटविशेषः । यथा, “वाह्यकी पिच्चिटः कुम्भी” ॥ इति सुश्रुते कल्पस्थाने ८ अध्याये ॥)

कुम्भी, स्त्री, (कुम्भ + अल्पार्थे ङीष् । क्षुद्रकुम्भः ।) उखा पाटलावृक्षः । वारिपर्णी । कट्फलः । इति हेमचन्द्रः ॥ वृक्षविशेषः । कुम्भीएम्प इति कोकणे प्रसिद्धा । तत्पर्य्यायः । रोमालुविटपी २ रोमशः ३ पर्पटद्रुमः ४ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । ग्राहित्वम् । वातकफापहत्वञ्च । दन्तीवृक्षः । इति राजनिर्घण्टः ॥

कुम्भीकः, पुं, (कुम्भीव कायते प्रकाशते । कै + कः ।) पुन्नागवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते ।
“ प्रियङ्गुसमङ्गाधातकीपुन्नागनागपुष्पचन्दनचन्दनमोचरसरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूलाचेति” ॥) कुम्भिका । यथा,—
“दूर्व्वाकशेरुपूतीककुम्भीकजलशैवलम्” ।
इति चक्रपाणिदत्तः ॥ (विकृतगर्भविशेषः । यथा,
“पुंस्त्वदोषात्तु पञ्चैव प्रोक्तास्तत्रैर्ष्यकः स्मृतः ।
आसेक्यश्चैव कुम्भीकः सुगन्धिखण्डसंज्ञितः” ॥
इति शार्ङ्गधरेण पूर्ब्बखण्डे सप्तमेऽध्याये उक्तम् ॥
“स्त्रे गुदेऽब्रह्मचर्य्यायः स्त्रीषु पुंवत् प्रवर्त्तते ।
कुम्भीकः स च विज्ञेयः” । इति सुश्रुते शारीरस्थाने २ अध्याये ॥)

कुम्भीनसः, पुं, (कुम्भीव नसा नासा यस्य ।) क्रूरसर्पः । इति मेदिनी ॥ (वायुप्रकृतिकविषकीटविशेषः । यथा । “कुम्भीनसस्तुण्डिकेरी” ॥ इति सुश्रुते कल्पस्थाने ८ अध्याये उक्तम् ॥)

कुम्भीनसी, स्त्री, (कुम्भीनस + स्त्रियां ङीष् ।) लवणदानवमाता । इति मेदिनी ॥ (यथा, रामायणे । ७ । ३० । १९ ।
“भ्रातॄंस्तान् धर्षयित्वेमान्त्वया नीता वराङ्गनाः ।